CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 472

Title Tattva bodhinī

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 472 Subject: Grammar.

Title: Tattva bodhini

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.4" by 5.2" Extent: 8 foll.

Language: Sanskrit Script: Devanagari

Remarks: —

१

कौमुदीवृत्तिर टीका

ॐ श्रीगणेशाय नमः॥ धातोः कार्यमुच्यमाने तत्प्रत्यये एव भवति॥ प्रकृतिप्रत्यययोः प्रत्यया-
श्रितं कार्यं बलवत्॥ सर्वविधिभ्यो लुग्विधिर्बलवान्॥ संप्रसारणं संप्रसारणाश्रितं कार्यं च
बलवत्॥ न संप्रसारणे संप्रसारणं॥ इति ज्ञापकात् पूर्वस्यैव संप्रसारणं॥ पूर्वत्रासिद्धीयमद्वि-
र्वचने॥ पूर्वत्रासिद्धीये न स्थानिवत्॥ असिद्धं बहिरंगमंतरंगे॥ अंतरंगे कार्ये कर्त्तव्ये सति बहिरंग-
मसिद्धं स्यात्॥ प्रकृतिप्रत्ययाश्रितं बहिरंगं॥ प्रकृत्याश्रितमंतरंगं॥ अल्पापेक्षमंतरंगं॥
बह्वपेक्षं बहिरंगं॥ पूर्वं पूर्वमंतरंगं॥ उत्तरोत्तरं बहिरंगं॥ पूर्वं धातुरुपसर्गेण युज्यते ततः
साधनेन॥ पूर्वं धातुः साधनेन युज्यते तत उपसर्गेणेति मतांतरं॥ दामागाग्रहणेष्वविशेषः॥
व्याख्यानतोऽर्थविशेषप्रतिपत्तिः॥ अनियमे नियमकारिणी परिभाषा॥ लुग्विकरणा-
लुग्विकरणयोरलुग्विकरणस्यैव ग्रहणं॥ प्रकृतिप्रत्ययांतःपाती विकरणः॥ लक्षणप्र- १
तिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं॥ लक्षणेन सूत्रेण निर्वृत्तः लाक्षणिकः॥ साक्षादुच्चा-
रितः प्रतिपदोक्तः॥ असिद्धवदत्राभात्॥ इत ऊर्ध्वमापादपरिसमाप्तेराभीयो समानाश्रये
तस्मिन् कर्त्तव्ये तदसिद्धं स्यात्॥ सहचरिता सहचरितयोः सहचरितस्यैव ग्रहणं॥

सन्नियोगशिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिः॥ नहि भुक्तवंतं मा भुंक्ष्वेति ब्रूयात्॥
शीघ्रोपस्थितिकं अंतरंगं विलंबोपस्थितिकं बहिरंगं॥ स्थानिनि यद्भवति तद्भव-
ति यन्न भवति तन्न भवति॥ वार्णादांगं बलीयः॥ ङिच्च पिन्न पिच्च ङिन्नेति भाष्यं॥
बहूनां समवाये द्वयोः संयोगसंज्ञा न॥ सानुबंधग्रहणेन अननुबंधस्य तदनुबंध-
ग्रहणेन अतदनुबंधकस्य॥ नानुबंधकृतमनेकाल्त्वं॥ नानुबंधकृतमसारूप्यं॥
येन नाव्यवधानं येन च व्यवधानं तेन व्यवहितेपि भवति॥ लक्ष्ये लक्षणं स-
कृदेव प्रवर्त्तते॥ पर्जन्यवल्लक्षणप्रवृत्तिः॥ अनंतरस्य विधिर्वा प्रतिषेधो वा॥
पुरस्तादपवादा अनंतरान् विधीन् बाधंते नोत्तरान्॥ विप्रतिषेधे परं कार्यं तुल्य-
बलविरोधे सति इष्टं कार्यं स्यात्॥ परनित्यांतरंगापवादानामुत्तरोत्तरं बलीयः॥
येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादः॥ कृताकृतप्रसंगी यो विधिः स नि-
त्यः॥ नित्यानित्ययोर्नित्यविधिर्बलवान्॥ संज्ञापूर्वको विधिरनित्यः॥ यथोत्तरं

लक्ष्यं उदाहरणं लक्षणं सूत्रं॥

को० द्वि० २
टीका

मुनीनां प्रामाण्यं । अंतादिवच्च । परांगाधिकारे तस्य तदं तस्य च । एकदेशविकृतम
नन्यवत् । अंतादिवच्च । योयमेकादेशः स पूर्वस्यांतवत् परस्यादिवच्च बोध्यः । उभ
यत आश्रयणे नांतादिवत् । अचश्च । ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच
इति षष्ठ्यंतं पदमुपतिष्ठते । तस्मिन्निति निर्दिष्टे पूर्वस्य । सप्तमीनिर्देशेन विधीय
मानं कार्यं वर्णांतरेणाव्यवहितस्य पूर्वस्य बोध्यं । अलोंत्यस्य । षष्ठीनिर्दिष्टांत्यस्यादे २
शः स्यात् । आदेः परस्य । परस्य यद्विहितं तत्तस्यादेर्बोध्यं । अलोंत्यस्येत्यस्यापवादः ।
तस्मादित्युत्तरस्य । पंचमीनिर्देशेन क्रियमाणं कार्यमव्यवहितस्य परस्य ज्ञेयं ।
एकस्य एक एव पुत्रः स एव ज्येष्ठः स एव कनिष्ठः । अन्यदिङ् यत्कायांवाख्याः । इ
त्यत्र ङकारस्य अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः । नि
मित्तापाये नैमित्तिकस्याप्यपायः । षाष्ठं द्वित्वं द्विरुक्तिः । हलोंनरभार्यावद्धर्मः ।

अंगस्येत्य
धिकारः ॥१२

पंचेशकारः सजः प्रोक्तः षात्रटकायगत्तवगजः ॥१

एकहलग्रहणे तदादेरेव ग्रहणं । अर्थवद्ग्रहणे नानर्थकस्य । नानर्थकेऽलोंत्यवि
धिरनभ्यासविकारे । संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत् । सकृद्गतौ
विप्रतिषेधे यद्बाधितं तद्बाधितमेव । पुनःप्रसंगविज्ञानेन भवति । सर्वं व्याकर
णनिष्पन्नं प्रयोगं न्यरुणद्धि या परिभाषा यनित्या सा प्रोक्तं व्याकरणकोविदैः ॥१
नकारजावनुस्वारपंचमौ झलि धातुषु । अंतः यदापेक्षं अंतरंगं बहिः पदा
पेक्षं बहिरंगं । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । सूत्रं यथार्थं
तस्य२ सत् किंचित् ज्ञापयति । येन चरितार्थत्वं तत्तेन ज्ञापनीयं । व्रश्चभ्रस्जेतिसूत्रे
केवलराज्ग्रहणेन सिद्धे राज्भ्राजोर्ग्रहणं अर्थवद्ग्रहणे नानर्थस्येति प
रिभाषायाः मस्तीतन्त्रकरणे तदंगं शुः स्याद्दाशब्विषये । इदं सूत्रं धातूनाम
नेकार्थत्वस्य ज्ञापकं । ओणृ अपनयने इत्यत्र धातोः ऋदित्करणात् । णौ
चङ्युपधाया ह्रस्वः । इति सूत्रेण आदौ ह्रस्वत्वं ततः । चङीति सूत्रेण द्वित्वमिति

कौ॰ षन्निर
टीका

स्नायतो। स्वरांतरेण संयुक्तहल्सहितस्यैवाद्यो द्वित्वां। हलादिः शेषः। इति स्त्र
त्रात्स्नापकात्। अस्तिसिचोपृक्ते। बहुलं छंदसि। छंदसि अस्तेर्धातोर्लङि आ
सीत्। आः। इति रूपद्वयं। वैयाकरणानां मात्रालाघवे पुत्रोत्सवः। विशेषणं
विशेष्येण बहुलम्। विशेषणं विशेष्येण वा समस्यते। स तत्पुरुषः। समानाधिकर
णस्तत्पुरुषः कर्मधारयः। सुपो धातुप्रातिपदिकयोः। एतयोरवयवस्य सुपो लुक्
स्यात्। प्रकृतिग्रहणे यङ्लुगंतस्यापि ग्रहणं। द्विः प्रयोगो द्विर्वचनं षाष्ठमि
तिसिद्धांतः। यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यंते। यो यस्य मध्ये पति ३
तः स तद्ग्रहणेन गृह्यते। अच्छगत्यर्थवदेषु। अव्ययमित्येवा गत्यर्थवदेषु
अच्छेत्यव्ययं गतिसंज्ञं स्यात्। ते प्राग्धातोः। ते गत्युपसर्गसंज्ञा धातोः
प्रागेव प्रयोक्तव्याः। अच्छवदति। अभिमुखं वदतीत्यर्थः। परस्मैपद्यात्म
नेपद्युभयपदिषु धातुषु इद्रकारः क्रमेण परस्मैपदात्मनेपदोभयपदार्थः।

आदितश्च। आकारेतो निष्ठाया इण्न स्यात्। इदितो नुम् धातोः। श्वीदितो नि
ष्ठायां। श्वयतेरीदितश्च निष्ठाया इण्न। उदितो वा। उदितः परस्य क्त्व इड्वा
स्यात्। स्वरतिसूतिसूयतिधूञूदितो वा। स्वरत्यादेरूदितश्च परस्य वला
देरार्द्धधातुकस्य इड्वा स्यात्। नाग्लोपिशास्वृदितां। णिचि अग्लोपिनः
शास्तेः ऋदितां च उपधाया ह्रस्वो न स्यात् चङ्परे णौ। पुषादिद्युताद्यॢ
दितः परस्मैपदेषु। पुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैप
देषु। ह्म्यंतक्षणश्वसजागृणिश्व्येदितां। ह्मयांतस्य क्षणादेर्ण्यंतस्य श्वय
तेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि। ओदितश्च। ओदितः निष्ठातस्य
प्रायेण र नः स्यात्। स्वकौ[redacted]रैकारौकारे तेषु धात्वनवोन संति। षिद्भिदादि
भ्योऽङ्। षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ्। क्तक्तवतू निष्ठा। एतौ निष्ठासंज्ञौ स्तः।

कौ० टि०
टी.का

नयोरेव स्यात्करवलस्थमिति भावकर्मणोरेव स्युः।१

निष्ठा। भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। वर्त्तमाने इत्यधिकृत्य। ञीतः क्तः। ञि
दितो धातोर्वर्त्तमाने क्तः स्यात्। ड्वितः क्त्रिः। अयं भाव एव स्वभावात्।
क्त्रेर्मम्नित्यं। डुपचष् पाके। पाकेन निर्वृत्तं। पक्त्रिमम्। ट्वितोऽथुच्। अयम
वा० ४ पि स्वभावाद्भाव एव। टुवेपृ कंपने। वेपथुः। येन विधिस्तदन्तस्य। विशेषणं
तदन्तस्य संज्ञा स्यात् स्वस्य च रूपस्य। समासप्रत्ययविधौ प्रतिषेधः।
उगिद्वर्णग्रहणवर्जम्। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयानां
अकारोपरि शर्षु च पाठस्योपसंख्यानं। सपेऽछंदसि। सपेऽछंदसि अन्य
स्य पुत्वं न स्यात् यङि। दाधर्त्ति दर्धर्त्ति दर्धर्षि बोभूतु तेतिक्ते स्रष्ट्यापनीफणत्सं
सनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृप
तं वरीवृजन्मर्मृज्यागनीगंतीति च। ~~स्तुतिस्थायोः संप्रसारणे~~ घसिभसोर्हलि च।
छंदसि अनयोरुपधाया लोपः स्यात् क्ङिति हलादौ च। क्ङिति अजादावपि। घसिभसोर्हलि च

४सिद्धिदा।
द्वित्वः।२

ऐरस्य इकारो ना
कारहृपाद्धातोर
...
समासप्रत्ययविधि
विति। ४ ...
...
नाप्रायनं च सौत्रना
उगिद्वर्णेति। नवत
अतिनवती। उगित
श्चेति ङीप्।४

४

१कारग्रहणे के
वलग्रहणं वर्ण
ग्रहणे सवर्णग्रह

सर्तिशास्त्यर्तिभ्यश्चात्। अस्यतेरङ् स्यात् कर्त्तरि लुङि।२

२चर्तो स्वर्गी

घि स्तदाद्यावल्ग्रहणे। सप्तमीनिर्दिष्टे अल्ग्रहणे वर्णग्रहणे यो विधिः स तदादौ
समुदाये बोध्यः। आद्यन्तापरत्वादद्।

कौं॰ द्यान्नेर:
टीका

५

कौमुदीवृत्ति
टीका

ॐश्रीगणेशायनमः॥ उच्चैरुदात्तः॥ ताल्वादिषु सभागस्थाने षूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः
स्यात्॥ आ ये॥ इति॥ निपाता आद्युदात्ता इत्याकार उदात्तः॥ यत्त्वशाश्वक्त फिट्स्वरेणोदा
त्तः॥ ततः परस्य जसः सुप्त्वादनुदात्तत्वं॥ फिषोंत उदात्तः॥ प्रातिपदिकं फिट् तस्यां
त उदात्तः स्यात्॥ अनुदात्तौ सुप्पितौ॥ एतावनुदात्तौ स्तः॥ न्यदाद्यत्वं पररूपत्वं॥
शीनावे आद्गुणे यस ... नि॥ एकादेश उदात्तेनोदात्तः॥ उदात्तेन सह एकादेश उदात्तः
स्यात्॥ इत्येकार उदात्तः॥ नीचैरनुदात्तः॥ स्पष्टम्॥ अर्वाङ्॥ अर्वंतमं यतीत्यर्वाङ्॥ ऋ १
त्विगादिना अंचतेः सुप्युपपदे क्विन्॥ अगता वित्यस्मात्॥ स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्॥
इत्युणादिसूत्रेण वनिपि गुणे यनिष्पन्नो वन्शब्दो धा ... तुस्वरेणाद्युदात्तः॥ वनिपः पि
ऽत्त्यात्॥ त्वेन अनुदात्ता... धातोः॥ अंत उदात्तः स्यात्॥ व्यपदेशिवद्भावेन आदेरेव अंतत्वं॥
अंयतेरकारो पिधातुस्वरेण निस्वरेण वा उदात्तः॥ ञ्नित्यादिर्नित्यं॥ ञिदंतस्य निदंतस्य
च आदिरुदात्तः स्यात्॥ उपपदमतिङ्॥ इति समासे कृते समासस्येति स्वरेण तदपवाद

भूतेन गतिकारकोपपदात्कृत्॥ इति कृदुत्तरपदप्रकृतिस्वरेण वा अंयतेरकार उ
पत्विर दात्तः॥ कर्षात्वतो घञोंत उदात्तः॥ इत्यत अंत उदात्त इत्यधिकृत्य॥ समासस्य॥ अ
स्य अंत उदात्तः स्यात्॥ वनो नलोपे सवर्णदीर्घे च कृते॥ एकादेश उदात्तेनोदात्तः॥ उदा
त्तेन सह एकादेश उदात्तः स्यात्॥ इत्याकार उदात्त ~~...~~ अनुदात्तं पदमेकवर्जं प इत्य४
विधि१ रिभाषेयं स्वरविषया॥ यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्ज
यित्वा शेषं तत्पदमनुदात्ताच्कं स्यात्॥ इति शेषनिघाताद्द्यकारोऽत्र अनुदात्तः॥ ए
तच्च संज्ञवाभिप्रायेणोक्तं॥ वेदभाष्ये तु अर्वाङ् अभिमुखमिति स्थितं॥ समाहारः
स्वरितः॥ उदात्तानुदात्तत्वे वर्णधर्मौ समाहृियेते यस्मिन्सोऽच् स्वरितसंज्ञः स्यात्॥
तस्यादित उदात्तमर्द्धह्रस्वम्॥ ह्रस्वग्रहणमतंत्रम्॥ अविवक्षितमित्यर्थः॥ स्वरित
स्यादितोऽर्द्धमुदात्तं बोध्यम्॥ उत्तरार्द्धं तु परिशेषादनुदात्तम्॥ तस्य च उदात्तस्वरि
परत्वे श्रवणं स्पष्टम्॥ तस्य स्वरितैकदेशानुदात्तस्य उदात्तस्वरितौ परौ यस्मात्तदु

कौ० वृत्ति । टीका

तितोंऽत स्वरि [illegible] तः स्यात् [illegible]

दात्तस्वरितपरं तस्य भावस्तस्मिन्सति । उदात्तः स्वरितो वा परश्चेत्पूर्वस्य स्वरितैकदेशो
दात्तस्य श्रवणं स्पष्टम् । अन्यत्र तूदात्तश्रुतिः प्रातिशाख्ये विहिता । कवोऽश्वाः रथानां
नयेऽशाः । शतचक्रं योऽह्यः इत्यादिष्वनुदात्तः । अग्निमीळे इत्यादावुदात्तश्रुतिः ॥

[illegible] के ति । किमोत् । वा ग्रहणमपकृष्यते । सप्तम्यंतात्किमोऽद्वा स्यात्पक्षे त्रल् । क्वाति । किमः
के त्यादेशः स्याद्वति । तित्स्वरितं । वइति । पदस्य पदात् । अनुदात्तं सर्वमपादादावित्यधि
कृत्य । बहुवचनस्य वस्नसौ । पदात्परयोरपादादौ स्थितयोः षष्ठ्यादिविशिष्टबहुवचनांतयो
र्युष्मदस्मदोर्वस्नसौ स्तः तौ चानुदात्तौ । इति वः अनुदात्तः । अश्वा इति । अश्रूकृषिलटि २
अशेः क४ कणिरवटिविशिभ्यः क्वन् इत्युणादिसूत्रेण कित् नित्स्वरेणाद्युदात्तः । संहितायामु
एकादेश उदात्तेनोदात्तः । इत्योकार उदात्तः । उदात्तपरत्वे कृस्व स्वरितस्योदाहरणमु
क्त्वा दीर्घस्वरितस्योदाहरणमाह । रथानामिति । ये अराः इति द्वयमपि फिट्स्वरेणांतो
दात्तं । एकादेशस्तु पक्षे स्वरितः । स्वरितो वानुदात्ते पदादौ । अनुदात्ते पदादौ परे उदात्तेन .

सहैकादेशः स्वरितो वा स्यात् । इत्युक्तेः । स्वरितपरत्वे उदाहरणमाह । शतचक्रमिति । यइति
फिट्स्वरेणांतोदात्तः । परस्य सस्य रुत्वोत्वे आद्गुणश्चोदात्तेनैकादेशादोकार उदात्तः ॥
अह्य इति स्वरितांतत्वादकारस्य शेषनिघातपरत्वे ओकारेण सहैकादेशोऽयं स तत्स्व
रितो वानुदात्ते पदादावित्योकारः स्वरितः । कथमह्य इत्यस्य स्वरितांतत्वमिति चेत्
अत्राहुः । अहव्यासौ स्वादिः । परस्मैपदी । अस्मात्कर्मणि यत् । तित्स्वरितं । तितोंतः
स्वरितः स्यात् । ह्रस्वभावस्तु संज्ञापूर्वकविधेरनित्यत्वात् इति । अग्निमीळे इति ॥
ईकारः स्वरितः । ळे इति उप्रत्ययापरपर्याया एकश्रुतिः । अग्निमित्यस्मात्परस्य ईळे
इत्यस्य । ~~उदात्तादनुदात्तस्य~~ तिङ्ङतिङः । अतिङंतात्पदात्परं तिङंतं निहन्यते । इत्यनु
दात्तत्वं । [illegible] ततः अग्निमित्यस्मात्परस्य ईळे इत्यस्य उदात्तादनुदात्तस्य स्वरितः ।
इति ईकारस्य स्वरितत्वं । स्वरविधौ व्यंजनमविद्यमानवत् । ततः परस्य ळे इत्यत्र एकार
स्यानुदात्तस्य । स्वरितात्संहितायामनुदात्तानाम् । स्वरितात्परेषामनुदात्तानां संहिता

यामेकश्रुतिः इत्युदात्तवत्श्रुतिः ॥